ओषधीशः, पुं, (ओषधीनामीशः) चन्द्रः। कर्पूरम्। इत्यमरः॥ (यथा, हरिवंशे ४६। ८।
"ओषधीशः क्रियायोनिरम्भोयोनिरनुष्णभाक्"॥)

ओष्ठः, पुं, (उष्यते दह्यते उष्णाहारेणेति। उष दाहे + "उषिकुषीति"। २। ४। थन्॥) दन्ताच्छादकावयवः। उपर ठोंट इति भाषा। तत्पर्य्यायः। रदनच्छदः २ दशनवासः ३। इत्यमरः॥ दन्तवासः ४ दन्तवस्त्रम् ५ रदच्छदः ६ इति राजनिर्घण्टः॥ तस्य द्विवचने ओष्ठौ ओष्ठाधराविति यावत्॥ (यथा, ऋग्वेदे। २। ३९। ६।
"ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः"। तथा मनुः। ८। २८२।
"अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः"॥
तथा, कुमारे ३। ६७।
"उमामुखे विम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि"॥)

ओष्ठपुष्पः, पुं, (ओष्ठ इव पुष्पं यस्य।) बन्धूकपुष्पवृक्षः। इति राजनिर्घण्टः॥

ओष्ठरोगः, पुं, (ओष्ठस्य रोगः।) आस्यरोगान्तर्गतोष्ठभवव्याधिः। स च वातपित्तकफसन्निपातरक्तमांसमेदोऽभिघातजत्वेनाष्टविधः। तेषां यथाक्रमं लक्षणानि यथा,—
"कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः॥
चीयेते पिड़काभिश्च सरुजाभिः समन्ततः।
सदाहपाकपिड़कौ पीताभासौ च पित्ततः॥
सवर्णाभिस्तु चीयेते पिड़काभिरवेदनौ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू॥
सकृत् कृष्णौ सकृत् पीतौ सकृत् श्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिड़काचितौ॥
खर्ज्जूरफलवर्णाभिः पिड़काभिर्निपीड़ितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुन्नतौ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात्॥
सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू।
स्वच्छं स्फटिकसङ्काशमास्रावं स्रवतो भृशम्॥
तयोर्व्रणो न संरोहेन्मृदुत्वञ्च न गच्छति।
ओष्ठौ पर्य्यवदीर्य्येते पाट्येते चाभिघाततः"॥
इति निदानम्॥
("ओष्ठौ च स्फुटितौ यस्य वातिवाहेन वातिकात्।
तस्य सर्पिर्मधाश्च ओष्ठदारणवारणे।
सदाहश्च भवेत्सौख्यं पैत्तिकं तं विनिर्दिशेत्।
मधुना नवनीतेन ओष्ठयोर्म्रक्षणं मतम्।
लेपनञ्चौष्ठरोगेषु शर्करासहितं दधि।
सरक्तमोष्ठरोगञ्च वृष्ट्वा रक्तावसेचनम्॥
धवार्ज्जुनकदम्बानां प्रलेपः स्यात् सुखावहः"॥
इति हारीते चिकित्सिते। २५ अध्याये॥
चिकित्सा यथा॥
"तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतः॥
ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ।
दाल्येते परिपाट्येते परुषासितकर्कशौ॥
पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ।
पिटिकाभिर्भृशक्लेदावाशुपाकौ कफात्पुनः॥
शीतासहौ गुरू शूनौ सवर्णपिटिकाचितौ।
सन्निपातादनेकाभौ दुर्गन्धास्रावपिच्छलौ॥
अकस्मात् म्लानसंशूनरुजौ विषमपाकिनौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
खर्ज्जूरसदृशश्चात्र क्षीणे रक्तेऽर्व्वुदं भवेत्।
मांसपिण्डोपमौ मांसात् स्यातां मूर्च्छत्कृमीक्रमात्॥
तैलाभश्वयथुक्लेदौ सकण्डू मेदसा मृदू।
क्षतजाववदीर्य्येते पाट्येते चासकृत्पुनः॥
ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ।
जलबुद्बुदवद्वातकफादोष्ठे जलार्व्वुदम्"॥
इति वाभटे उत्तरस्थाने। २१ अध्याये॥
"खण्डोष्ठस्य विलिख्यान्तौ स्यूत्वा व्रणवदाचरेत्।
यष्टी ज्योतिष्मती-रोध्र-श्रावणी-सारिवोत्पलैः॥
पटोल्या काकमाच्या च तैलमभ्यञ्जनं पचेत्।
नस्यञ्च तैलं वातघ्नमधुरस्कन्धसाधितम्॥
महास्नेहेन वातौष्ठे सिक्ते नाक्तः पिचुर्हितः।
देवधूपमधूच्छिष्टगुग्गुल्वमरदारुभिः॥
यष्ट्याह्वचूर्णयुक्तेन तेनैव प्रतिसारणम्।
नाड्योष्ठं स्वेदयेद्दुग्धसिद्धैरेरण्डपल्लवैः॥
खण्डोष्ठविहितं नस्यं तस्य मूर्द्ध्नि च तर्पणम्।
पित्ताभिघातजावोष्ठौ जलौकोभिरुपाचरेत्॥
रोध्रसर्जरसक्षौद्रमधुकैः प्रतिसारणम्।
गुड़ूची यष्टिपत्तङ्गसिद्धमभ्यञ्जने घृतम्॥
पित्तविद्रधिवच्चात्र क्रियाशोणितजेऽपि च।
इदमेव भवेत्कार्य्यं कर्म्मौष्ठे तु कफोत्तरे॥
पाठाक्षारमधुव्योषैर्हृतास्रे प्रतिसारणम्।
धूमनावनगण्डूषाः प्रयोज्याश्च कफच्छिदः॥
स्विन्नं भिन्नं विमेदस्कं दहेन्मेदोजमग्निना।
प्रियङ्गुरोध्रत्रिफलामाक्षिकैः प्रतिसारयेत्॥
सक्षौद्राघर्षणम् तीक्ष्णा भिन्नशुद्धे जलार्व्वुदे।
अवगाढेऽतिवृद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया"॥
इति च वाभटे उत्तरस्थाने॥ २२ अध्याये॥
चिकित्सादिविवृतिस्तु मुखरोगशब्दे द्रष्टव्या॥)

ओष्ठी, स्त्री, (ओष्ठ इवाचरति पक्वावस्थायाम्। ओष्ठ + क्विप्। ततोऽच् + ङीप् च।) विम्बफलम्। इति रत्नमाला॥ तेलाकुचा इति भाषा॥

ओष्ठोपमफला, स्त्री, (ओष्ठोपमानि ओष्ठसदृशानि फलानि यस्याः।) विम्बिका। इति जटाधरः॥ (तेलाकुचा इति भाषा॥)

---

## औ

औ, औकारः। स तु चतुर्दशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। ("ओदौतोः कण्ठौष्ठम्"। इत्युक्तेः। तथा च शिक्षायाम्।
"एऐ तु कण्ठ-तालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"।)
स दीर्घः प्लुतश्च भवति न ह्रस्वः॥ (प्रत्येकमुदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि पुनरनुनासिकाननुनासिकभेदात् षड्विध एतेन द्वादशविध एव।)
"रक्तविद्युल्लताकारं औकारं कुण्डली स्वयम्।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये॥
पञ्चप्राणमयं वर्णं सदाशिवमयं सदा।
सदा ईश्वरसंयुक्तं चतुर्व्वर्गप्रदायकम्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गभाषायां) तस्य लेखनप्रकारो यथा,—
"ओकारमध्यदक्षे तु गता तूर्द्ध्वगतायता।
किञ्चित् सा वामतो वक्रा तासु ब्रह्मेशविष्णवः॥
शक्तिमध्यगता रेखा ध्यानमस्य प्रचक्ष्यते"।
इति वर्णोद्धारतन्त्रम्॥ *॥ अस्य नामानि यथा,
"औकारः शक्तिको नादस्तैजसो वामजङ्घकः।
मनुरर्द्धेशहेशश्च शङ्कुकर्णः सदाशिवः॥
अधोदन्तश्च कण्ठौष्ठौ सङ्कर्षणः सरस्वती।
आज्ञा चोर्द्धमुखी शान्तो व्यापिनी प्रकृतः पयः॥
अनन्ता ज्वालिनी व्योमा चतुर्द्दशी रतिप्रियः।
नेत्रमात्मकर्षिणी च ज्वालामालिनिका भृगुः"॥
इति तन्त्रशास्त्रम्॥ शेषदशनः। सत्यान्तः। इति वीजवर्णाभिधानम्॥ (मातृकान्यासेऽधोदन्तपङ्क्तौ न्यस्ततया तच्छब्देनाप्यभिधानम्। मातृकान्यासमन्त्रो यथा,—
औं नम ऊर्द्धदन्तपङ्क्तौ औं नमोऽधोदन्तपङ्क्तौ"॥
अनुबन्धविशेषः। यदुक्तं कविकल्पद्रुमे। "ओर्निस्तान औरनिट्"। तेन दृशि रौ प्रेक्षणे इत्यस्य लृटि कृते द्रक्ष्यति इति स्यात्॥)

औ, व्य, आह्वानम्। सम्बोधनम्। इति मेदिनी॥ विरोधः। निर्णयः। इति शब्दरत्नावली॥ (गणभेदः। स च चादिः। इति पाणिनिः। १। ४। ५७।)

औँ, व्य, शूद्राणां प्रणवः। यथा,—
"चतुर्द्दशस्वरो योऽसौ सेतुरौकारसंज्ञितः।
स चानुस्वारनादाभ्यां शूद्राणां सेतुरुच्यते"॥
इति तन्त्रसारधृतकालिकापुराणम्॥

औः, पुं, अनन्तः। इत्येकाक्षरकोषः॥ निस्वनः। इति मेदिनी॥

औः, स्त्री, विश्वम्भरा। इति मेदिनी॥

औक्षकं, क्ली, उक्ष्णां समूहः। ("गोत्रोक्षोष्ट्रोरभ्रेति"। ४। २। ३९॥ वुञ्।) वृषसमूहः। इत्यमरः॥ एँड़े गरुर पाल इति भाषा॥

औख्यं, त्रि, (उखायां निष्पन्नं, उखा + यत् + स्वार्थे + ष्यञ्।) स्थालीपक्वान्नादि। उखायां निष्पन्नम् इत्यर्थे ष्यप्रत्ययः॥

औचिती, स्त्री, (उचितस्य भावः। ब्राह्मणादित्वात् ष्यञ् + ङीष्। "हलस्तद्धितस्य"। ६। ४। १५०। इति यलोपः॥) औचित्यम्। इति लिङ्गादिसंग्रहे अमरः॥
("सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः"। इति साहित्यदर्पणम्॥)

औचित्यं क्ली, (उचित + ष्यञ्।) उचितस्य भावः। उपयुक्तता। योग्यत्वम्। इत्यमरः॥ (यथा साहित्यदर्पणे ३य परिच्छेदे।
"एता अपि यथौचित्यादुत्तमाधममध्यमाः"॥)

औड़वः, पुं, (औड़वी संख्या विद्यते यस्य स औड़वः। यद्वा ओडव एव + स्वार्थे अण्।) ओड़वस्वरः। स च रागस्य जातिविशेषः। पञ्चस्वरमिश्रित-